शिक्षा-निदेशालयः, राष्ट्रीयं राजधानीक्षेत्रम्, दिल्ली-सर्वकारः
प्रथमसत्रीय**आदर्शप्रश्नपत्रम्**- 2026-27
कक्षा - द्वादशी
संस्कृतम् (केन्द्रिकम्) (कोड–322)

समयः होरात्रयम् सम्पूर्णाकाः- 80

सामान्य निर्देशाः –
1.कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रमुखाः प्रश्नाः सन्ति।
2अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति –
खण्डः (क) अपिठत-अवबोधनम् - 10 अङ्काः
खण्डः (ख) रचनात्मककार्यम् - 15 अङ्काः
खण्डः (ग) अनुप्रयुक्तव्याकरणम् - 20 अङ्काः
खण्डः (घ) I. पठित-अवबोधनम् - 25अङ्काः
II. संस्कृत - साहित्येतिहास – परिचयः - 10 अङ्काः

3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांङ्काः अवश्यं लेखनीयाः।
4. प्रश्न-संख्या प्रश्नपत्रानुसारम् अवश्यम् एव लेखनीया ।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| | | |
|---|---|---|
| 1. | खण्डः (क)<br>**अपठित अवबोधनम्**-10 **अङ्काः**<br><br>**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत**-10 **अंकाः**<br><br>आधुनिकवैज्ञानिकयुगेदूरदर्शनम्एकम्आश्चर्यकरम्आविष्कारम्अस्ति । गृहस्थिताःएवजना: दूरस्थानिचित्राणिस्वनेत्रयोःपुरतःपश्यन्ति, चित्रगतानांजनानांवचनानिचकर्णाभ्याम्प्रत्यक्षतःशृण्वन्ति । अयंहिविद्युत्तरंगाणांचमत्कारः।अस्यमूलरूपेणआविष्कारक: नियकाऊमहोदयःअस्ति।बेयर्डफार्सवर्थ-ज्वोरिकननामकै: वैज्ञानिकै: एतत्वर्तमानरूपंआविष्कृतम्।<br><br>दूरदर्शनप्रेषकयन्त्रैःक्रमवीक्षणपद्धत्याचित्राणिआकाशेविद्युत्तरंगैःप्रेष्यन्तेतानिचसंग्राहियन्त्रैःगृहीत्वाचित्रपटेप्रवचनेदूरदर्शनम्आबालवृद्धानांमनोरञ्जनस्य साधनम्स्वीकृतम् । शिक्षाज्ञानकलाराजनीतिप्रभृतिषुक्षेत्रेषुअस्यअतीवसजीवचित्राणिदृष्ट्वाअल्पज्ञः अपिगम्भीरार्थम्सम्यक्अवगन्तुम्आत्मसात्वकर्तुंशक्नोति । आकर्षकाकार्यक्रमात्रूपकाणि, नृत्यानि, महापुरुषाणांजीवनवृत्तम्देश-विदेशीयचित्राणिएकान्तेस्वेच्छानुसारंगृहेआसीना: एववयम्द्रष्टुम्शक्नुमः ।<br><br>**प्रश्ना**:-<br><br>**अ) एकपदेनउत्तरत** – 1x2=2<br><br>(i) दूरदर्शनस्यमूलरूपेणआविष्कारकःकःअस्ति?<br><br>(ii) दूरदर्शनस्यवर्तमानरूपम्कै: वैज्ञानिकैःआविष्कृतम् ?<br><br>(iii) आधुनिकयुगेकिंआश्चर्यकरंआविष्कारम्अस्ति?<br><br>**आ) पूर्णवाक्येनउत्तरत** - 2x2=4<br><br>(i) केषुक्षेत्रेषुदूरदर्शनस्यमहत्त्वम् ?<br><br>(ii) वयम्दूरदर्शनेकिंपश्यामः ?<br><br>(iii) कुत्रदूरदर्शनस्यअतीवमहत्त्वंवर्तते? | |

| | | |
|---|---|---|
| 2. | **(इ) अस्यअनुच्छेदस्यकृतेसमुचितंशीर्षकंलिखत** - 1x1=1<br>**(ई) भाषिककार्यम्** – **(प्रश्नत्रयम)** – 1x3=3<br>(क) "अल्पंजानाति' इतिवाक्यांशायप्रयुक्तंपदंअस्ति।<br>(i) सर्वज्ञः (ii) बहुज्ञः (iii) अल्पज्ञः (iv) विशेषज्ञः<br>(ख) "आकर्षकान्" अस्यपदस्यविशेषणपदंकिम्?<br>(i) कार्यक्रमान् (ii) साधनान्, (iii) महापुरूषान्, (iv) वृद्धानाम्<br>(ग) "आसीनाःएववयंद्रष्टुंशक्नुमः" अत्रक्रियापदंकिम्?<br>(i) आसीनाः (ii) द्रष्टुम् (iii) शक्नुमः (iv) वयम्<br>(घ) अत्र "स्वीकृत्य" पदस्यकिंपर्यायपदंप्रयुक्तम्?<br>(i) दृष्टवा (ii) गृहीत्वा (iii) अवगन्तुम् (iv) आविष्कृतम्<br>**खण्ड-ख**<br>**रचनात्मकंकार्यम्** 15<br>भवतः नाम सक्षमः छात्रावासे व भवान् वसति । अजन्ता-अलोरा-गुहावर्शनार्थं शैक्षिकयात्रायै गन्तुम् इच्छन्ति।धनप्रेषणार्थ पितरं प्रति लिखितं पत्रं मंजूषायां प्रदत्तैः उचितशब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत-<br>22, कारि छात्रावासः<br>(i)------------------<br>तिथिः---------------<br>परमादरणीयाः (ii)--------------<br>सादरं प्रणमामि।<br>सविनयं (iii)--------------यत् मम त्रैमासिकी परीक्षा समाप्तिं गता। मम (iv)------------शोभनानि अभवन्। अस्मिन(v)--------------- अहं गृहं न आगमिष्यामि, यतः विद्यालयेन एकस्याः (vi)-----प्रबन्धः कृतः । एषा अजन्ता एलोरागुहानां दर्शनाय आयोजिता अस्ति। यात्राव्ययार्थं (vii)------------रूप्यकाणि प्रेषयन्तु भवन्तः। शेषं सर्वं कुशलम्।मम (viii)---------अग्रजाय च सादरं (ix)----------।<br>भवदीयः (x)---------- | |

सक्षमः।

मञ्जूषा-

| |
|---|
| निवेदयामि,प्रियपुत्रः,शैक्षिकयात्रायाः,पंचशतम्,कालिकातातः,शरदवकाशे,जनन्यै त्राणि, पितृमहाभागाः, प्रणामाः,अम्बायै |

3.अ) अधः प्रदत्तं चित्रम् आधृत्य पञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदमेकं लिखत- 5



मञ्जूषा

| |
|---|
| गुरुकुलम्, छात्राः, प्राकृतिक वातावरणम्, प्राचीनकाले, शिक्षाव्यवस्था, उत्तमा |

आ) **"जलम्एवजीवनम्" इतिविषयमधिकृत्यपञ्चविंशतितः त्रिंशत्परिमितैः शब्दैः अनुच्छेदं लिखत।**

| |
|---|
| जलम्, प्राणीनां, जीवनम्, नद्यः, मधुरम्, पृथिव्यां, पादपानां, संरक्षणीयम्, वर्षाजलं |

4.(अ)मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत- 1/2x10=5

एकदा शीतस्य भीषणः(i)......... अभवत्। सम्राट् चन्द्रगुप्तः निश्चितवान् यत् निर्धनेभ्यः(ii).......... वितरणं भवेत्। प्रधानमंत्री चाणक्यः तत्कार्यं(iii)......... | भृत्याः सर्वान् कम्बलान् तस्य कुटीरे स्थापितवन्तः । रात्रौ केचन चौराः कम्बलान्(iv)........... तस्य कुटीरं प्राविशन्। ते अपश्यन् यत् चाणक्यः एकस्मिन् कटे कम्बलं विना एव(v)......। तस्मिन् एव क्षणे(vi)........... पद्ध्वनिं

श्रुत्वा प्रबुद्धः।(vii)........ तम् अपृच्छन्- 'भवतां समीपे कम्बलानां राशिः अस्ति तथापि भवान् कम्बलं विना एव(viii)........ ।' चाणक्यः अवदत्-'श्रृणुत! एते प्रावारकाः केवलं निर्धनेभ्यःवितरणार्थम् एव सन्ति। यदि अहम् एतेषु एकं (ix)........ तर्हि अहम् अपि चौरः भविष्यामि।' "नतमस्तका चौराः"' तस्य पादयोः पतित्वा(x)...............अकुर्वन्।

मञ्जूषा

| |
|---|
| स्वीकृतवान्,चोरयितुं,स्वीकरोमि,क्षमायाचनाम्,प्रकोपः,कम्बलानां, सुप्तः,चाणक्यः,चौराः, स्वपिति |

अथवा

(आ)अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु-1x5-5

अधोलिखितम् संवादम् मञ्जूषायाः उचितानि वाक्यानि चित्वा पूरयत उत्तरपुस्तिकायं च लिखत-

अनीशः-नमस्ते ! किम् कुशला त्वम् ?

रमा-आम् ! (i)---------------------

अनीशः-किं तव समीपम् संगणकयंत्रम् अस्ति ?

रमा-आम् ! (ii)------------------------

अनीशः-(iii)--------------------------

रमा-त्रिंशत् सहस्ररुप्यकाणि।

अनीशः-किम् एतेषाम् रुप्यकाणाम् व्ययः सार्थक: अस्ति न वा ?

रमा-(iv)----------------------। अद्यत्वे त्वम् यंत्रे अनेकानि कार्याणि कर्तुम् पारयसि।

अनीशः-अहम् अपि गृहम् गत्वा कमपि उपायं चिन्तयामि येन मम पिता अपि मम निवेदनं स्वीकुर्यात्।

रमा-(v)--------------------------

| |
|---|
| **अहम् कुशला अस्मि , मम जनक: मम जन्मदिवसे उपहाररूपेणइदं अयच्छत्,मूल्यम् किम् ! ,नूनम् सार्थक: अस्ति,आशासे शीघ्रम् एव तव समीपे अपि एतत् यन्त्रम् भविष्यति** |

**खण्डः - ग**

**अनुप्रयुक्तव्याकरणम्** 20 **अङ्काः**

5.**अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिविच्छेदंवाकुरुत**- 1x4=4

(i) **सत्यान्न** प्रमदितव्यम् ।

(ii) अथ कुत **उत्पन्नोऽयं**दोषः ?

(iii) तत् किं नाज्ञायि **अद्यापि**भवता ।

(iv) **शरीरेऽरिः**प्रहरति हृदये स्वजनस्तथा

(आ)**अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं सन्धिपदं सन्धिविच्छेदं वा कुरुत**-

(i) तया भरतोऽभिषिच्यतां राज्य**इति+ उक्तम् ।**

(ii) वेदमनुच्य**आचार्योऽन्तेवासिनम्**अनुशास्ति ।

(iii) वैवस्वतो **मनुर्नाम** माननीयो........।

(iv)उदर्केण**गुणेन + अत्र**भवितव्यम्।

6. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं समस्तपदं विग्रहवाक्यं वा प्रदत्तविकल्पेभ्यः चिनुत**-1x4=4

(i) लक्ष्मणः **सक्रोधम्** अवदत्।

(क) क्रोधेन सहितम्, (ख) क्रोधम् सह (ग) क्रोधस्य सहितम् 1x5=5

(ii) यस्याः भर्ता **शक्रसमः** अस्ति ।

(क) शक्रेण समः (ख) शक्राय समः (ग) शक्रे समः

(iii)कथमस्मान् संन्यासनोऽपि **<u>कठोरभाषणैः</u>** तिरस्करोषि ?

(क)कठोरैः भाषणैः (ख) कठोर भाषणैः (ग) कठोरं भाषणम् इति

(iv) तादृशाः एव **पुरस्कारभाजनानि** भवन्ति ।

(क)पुरस्कारस्य भाजनानि (ख)पुरस्काराय भाजनानि (ग)पुरस्कारेण भाजनानि

7. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत- (केवलं प्रश्नषट्कम)** 1x4=4

(i) **स्वाध्यायान्न <u>प्रमदितव्यम्</u>।**

(क) प्र + मद् + तव्यत् (ख) प्र + मद् + शानच्

(ग) प्र + मद् + अनीयर

(ii)**<u>मैथिल+ङीप्</u>** ! किं व्यवसितव्यम् ।

(क)मैथिलि (ख)मिथिला (ग)मैथिलीप्

(iiii) समीपम् **<u>आगत्य</u>** सन्यासिना।

(क)आ+गत्य (ख)आ+गम्+ल्यप् (ग)आ+गत्+य

(iv) हन्त! निवेदितम् **<u>अप्रभुत्वम्</u>** ।

(क) अप्रभु + त्वम् (ख)अप्रभु+ त्वल् (ग) अप्रभु + त्व

8. **समुचितं उपपदविभक्तिरूपं चिनुत-** 1x4=4

(i) ..................न प्रमदितव्यम्।

(क) स्वाध्यायेन (ख) स्वाध्यायात् (ग) स्वाध्यायम्

(ii) अतः परं मातुः ......... श्रोतुं न इच्छामि |

(क) परिवादं (ख) परिवादाय (ग) परिवादः

(iii) धिक्!................. अविज्ञाय उपालभसे।

(क)अस्मदं (ख )अस्मान् (ग) अहम्

(iv) महाराजशिववीरस्याज्ञां वयं.........वहामः ।

(क)शिरसा (ख)शिरसि (ग) शिरम्

**9. (अ)वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं लिखत**-4x1=4

रामभद्रः भोः नारायण! (i) ........ अधुना कुत्र गम्यते?

नारायणः किं न जानासि त्वम्? सः पठनाय (ii)-------------गच्छति ।

रामभद्रः तेन गृहं पुनः कदा (iii) ............?

नारायण - निश्चयेन अध्ययनं समाप्य एव (iv)---------गृहं प्रत्यागमिष्यति।

मञ्जूषा

| आगमिष्यते, विदेशम्, सः, श्यामेन। |
|---|

अथवा

(आ) वाच्यानुसारं समुचितैः पदैः रिक्तस्थानानि पूरयित्वा अधोलिखितानि वाक्यानि लिखत-

(i) किं तेन सः--------------(ज्ञा)?

(ii)------------- (अस्मद्) न जानामि ।

(iii) गुरुः सर्वान्------------ (शिष्य) पाठयति।

(iv) शिष्यैः ध्यानेन------------(पाठ) पठ्यन्ते ।

## **खण्ड -घ** (**भागः**-1)

## **पठितावबोधनम्** 25

10.**अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत** - (5)

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति।सत्यंवद।धर्मंचर। स्वाध्यायान्मा प्रमदः। आचार्यायप्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां
न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि
कर्माणि, तानि सेवितव्यानि, नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि,नो
इतराणि। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः
सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः, यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः।
एष आदेशः। एष उपदेशः। एषा वेदोपनिषत् । एतदनुशासनम्। एवमुपासितव्यम्। एवं चैतदुपास्यम्।

(अ) एकपदेन उत्तरत- (केवलं प्रश्नद्वयम् ) (1/2x2=1)

(i) काभ्यां न प्रमदितव्यम् ?

(ii) कं मा व्यवच्छेत्सी ?

(iii) कै न प्रमदितव्यम् ?

(आ).पूर्णवाक्येन उत्तरत-(केवलंप्रश्नद्वयम्) (1x2=2)

(i)कानि सेवितव्यानि ?

(ii) ब्राह्मणाः कीदृशाः स्युः ?

(iii) कानि त्वयोपास्यानि ?

(इ)(**अ) निर्देशानुसारम् उत्तरत** -2x1=2

(i)"प्रियं धनम् " अनयोः पदयोः विशेषणपदं किम्?

(ii)"वृत्तविचिकित्सा वा स्यात्। " अत्र क्रियापदं किम्?

**अथवा**

(**आ) निर्देशानुसारम् उत्तरत** -

(i)" लूक्षा " इति पदस्य विलोमपदं किम्?

(ii)" गुरवे" इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

11.**अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत**
( 5)

**त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्।**
**यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥**

(**अ) एकपदेन उत्तरत-(केवलप्रश्नद्वयम्)**2x1/2=1
(i) **केषां धनं त्यागाय भवति** ?
(ii) **विजिगीषूणां जयः कस्मै भवति** ?
(iii)**मितभाषिताकस्मै अस्ति**?
(**आ) पूर्णवाक्येन उत्तरत-(केवलप्रश्नद्वयम्)** 1x2=2
(i) **केषां मितभाषिता सत्याय अस्ति** ?
(ii) **केषां परिणयः प्रजायै अस्ति** ?
(iii)**केषां जयः यशसे भवति** ?
**(इ) यथानिर्देशम् उत्तरत-** 2x1=2
(i) **'संग्रहाय' इति पदस्य विलोमपदं किं प्रयुक्तम्** ?
(ii) **'अल्पभाषिणाम्' इति पदस्य पर्यायपदं किं प्रयुक्तम्** ?

**अथवा**

(i)“**प्रसिद्धयै**”**इत्यर्थे किं पदमत्र प्रयुक्तम्**?

(ii)**असत्याय इत्यस्य विलोमपदं अत्र किम् अस्ति** ?

12.**अधोलिखितं नाट्यांश पठित्वा तदाधारितान प्रश्नान् संस्कृतेन उत्तरत** - ( 5)

**काञ्चुकीयः - परित्रायतां परित्रायतां कुमारः।**

**रामः - आर्य! कः परित्रातव्यः ।**

**काञ्चुकीयः -महाराज!**

**रामः -महाराजः इति। आर्य! ननु वक्तव्यम्। एकशरीर-संक्षिप्ता**

**पृथिवी रक्षितव्येति । अथ कुत उत्पन्नोऽयं दोषः?.**

**काञ्चुकीयः -स्वजनात्।**

**रामः -स्वजनादिति। हन्तः नास्ति प्रतीकारः।**

**शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।**

**कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति** ॥1॥

(अ) **एकपदेनउत्तरत-(प्रश्नद्वयम्)2x ½=1**

(i) **अरिः कुत्र प्रहरति** ?

(ii) **हृदये कः प्रहरति** ?

(iii)**कः परित्रातव्यः**?

(आ) **पूर्णवाक्येन उत्तरत-(प्रश्नद्वयम्)2x1=2**

(i) **काञ्चुकीयः किं कथयति** ?

(ii)**स्वजनशब्दः मे काम् उत्पादयिष्यति**?

(iii)**एकशरीर-संक्षिप्ताका रक्षितव्येति**?

(**इ**)(अ) **निर्देशानुसारम् उत्तरत**-**2x1=2**

(i) "**एकशरीरसंक्षिप्ता पृथिवीः**" **अनयोः पदयोः विशेष्यपदं किम्** ?

(ii) "**मनसि**" **इत्यस्य पदस्य पर्यायपदं किम्** ?

**अथवा**

(आ)यथानिर्देशम् उत्तरत-

(i)अत्र " **शत्रुः** इत्यर्थेकिंपदंप्रयुक्तम्?

(ii)**परिजनः** इत्यर्थेकिंपदमत्र प्रयुक्तम्?

13.(**अ**)**अधोलिखितस्य पद्यस्य भावार्थं मजूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत** - **1x3=3**

**आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।**

**आगमैः सदृशारम्भ आरम्भसदृशोदयः ।।**

**भावार्थः- यथा राज्ञः दिलीपः...........विशालः आसीत् तथैव तस्य.......अपि विशाला आसीत् । बुद्धेः अनुसारं.......अभ्यासमपि करोति स्म। शास्त्रोक्तविधिना कार्यं करोति तदनुरूपमेव फलं प्राप्नोति स्म ।**

**मञ्जूषा**

| |
|---|
| **शरीरेण, शास्त्राणाम् ,बुद्धिः** |

अथवा

(**आ**) **प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत** -

(**अ**) '**अनन्यशासनामुर्वी शशासैकपुरीमिव ।**'

(i) न अन्यशासकेन शासितां पृथ्वीम् एकपुरीमिव शासनं चकार ।

(ii) अन्यशासकेन शासिताम् वसुधां शशास।

(iii) सर्वशासकेन शासितं गगनं शासनं चकार ।

**(ब) 'सहस्त्रगुणमुत्स्त्रष्टुमादत्ते हि रसं रविः।'**

(i) रविः कतिगुणमुत्स्रष्टुं जलं गृह्णाति ।

(ii) चन्द्रः सहस्रगुणमुत्कर्षितुं जल पिबति।

(iii) सूर्यः सहस्रधा दातुं जलं गृह्णाति ।

**(स) 'वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति'**

(i) आचार्यः वेदं पाठयति ।

(ii) शिष्यः वेदं पठति।

(iii) आचार्यः वेदं पाठयित्वा शिष्यम् उपदिशति ।

14. **अधोलिखित-अन्वये रिक्तस्थानानिपूरयत - 3x1=3**

**वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।**

**आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ||**

**अन्वयः वैवस्वतः..........माननीयः छन्दसाम्**

**..........इवमहीक्षिताम्आद्यः........नाम आसीत् ।**

**मञ्जूषा**

| |
|---|
| **प्रणवः, मनीषिणाम्, मनुः** |

15.**क' स्तम्भस्य वाक्यांशस्य 'ख' स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत**- 4x1=4

**क स्तम्भः** **'ख' स्तम्भः**

(i). भुशुण्डी स्कन्धे निधाय (**क**) **केवलं जन्महेतवः।**

(ii) **आकारसदृशः प्रज्ञः .** (**ख**) **स ताभ्यो बलिमग्रहीत्।**

(iii) **स पिता पितरस्तासां .** (**ग**) **प्रज्ञया सदृशागमः।**

(iv) **प्रजानामेव भूत्यर्थं .** (**घ**) निपुर्णं निरीक्षमाणः

अथवा

**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुसारं प्रदत्तविकल्पेभ्यः समुचितम् उत्तरं चिनुत** -

(i) त्यागाय संभृतार्थानां सत्याय **मितभाषिणाम्।**

(ii) असौ मया **हतः** शत्रुः

(iii)यान्यस्माकं **सुचरितानि** तानि त्वयोपास्यानि ।

(iv)शरीरे **अरिः** प्रहरति।

| |
|---|
| अल्पभाषिणाम्,सुकर्माणि,मारितः, शत्रुः |

**'घ' भागः 2**

**संस्कृतसाहित्येतिहासपरिचयः 10**

16.**समुचितस्य रचनायाः कवेः वा अभिधानं लिखत - (केवलं प्रश्नत्रयम्** )1x3-3

(i) " प्रजानुरंजकोनृपः" अस्याः रचनायाः लेखकः कः?

(ii) अम्बिकादत्तव्यासः” अस्य लेखकस्य रचना का?

(iii)अनुशासनम्" इति पाठः कस्याः उपनिषदः सङ्गृहीतः ?

(iv) "मातुराज्ञा गरीयसी" इत्यस्य पाठस्य रचयिता कः?

**17.गद्य-पद्य-नाटक-विधानांसमुचितंवैशिष्ट्यंमञ्जूषातःचित्वारिक्तस्थानानिपूरयत-(केवलंप्रश्नत्रयम) 3x1-3**

(i).............कवीनांनिकषंवदन्ति ।

(ii) खण्डकाव्यमेव.........नाम्नापिज्ञायते।

(iii) सर्गबन्धो.................कथ्यते ।

(iv) ...........संस्कृतगद्यस्यप्राणाः

**मञ्जूषा**

| |
|---|
| गद्यं ,गीतिकाव्यं ,महाकाव्यं, ओजः |

**18. नाट्य-तत्त्वानांसमुचितंवैशिष्ट्यंमञ्जूषातःचित्वारिक्तस्थानानिपूरयत(केवलं) प्रश्नचतुष्टयम)4x1=4**

(i) संस्कृतनाटकानि (क) दश

(ii) रूपकस्य (ख) सुखान्तानि

(iii) नाटकस्यअन्ते (ग) रघुवंशम्

(iv) कालिदासस्यप्रसिद्धंमहाकाव्यम् (घ) भरतवाक्यम्